International Journal of Sanskrit Research 2021; 7(1): 216-220

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 216-220
© 2021 IJSR
www.anantaajournal.com
Received: 15-11-2020
Accepted: 22-12-2020

**सुजित-दे इत्यनेन**
Ranibazar, Antpur, Hooghly, Jangipara, West Bengal, India

**Corresponding Author:**
**सुजित-दे इत्यनेन**
Ranibazar, Antpur, Hooghly, Jangipara, West Bengal, India

# भट्टोद्भटीयकाव्यलिङ्गस्य विमर्शः

## सुजित-दे इत्यनेन

**भूमिका-**
भिन्नरुचिर्हि लोकः इति रीत्या उद्भटाचार्येण दण्डिनिरूपितेषु भामहनिरूपितेषु चालङ्कारेषु केचित् स्वीकृताः केचिच्च न। साकल्येन तेन चतुस्त्रिंशदलङ्काराः काव्यालङ्कासारसंग्रहे निरूपिताः। तेषु पुनरुक्तवदाभासः, छेकानुप्रासः, लाटानुप्रासः, प्रतिवस्तूपमा, काव्यलिङ्गं, दृष्टान्तः सङ्करश्चेति सप्तालङ्काराः स्वेन कल्पिताः। एतेषां सप्तसंख्यकानामलङ्काराणां चर्चा सर्वादौ काव्यालङ्कारसारसंग्रह एव दृश्यते। ततः परवर्तिनः वामन-मम्मटप्रमुखाचार्याः तानेव सप्तसंख्यकानलङ्कारान् गृहीत्वा स्वकल्पनाकपोलेन परिवर्त्य परिवर्ध्य च निर्णयाञ्चक्रुः। तेषु सप्तसंख्यकेषु अलङ्कारेषु काव्यलिङ्गस्य वैलक्षण्यं प्रेक्ष्य तस्यैव चर्चास्मिन् शोधबन्धे प्रस्तुतं मया।
काव्यालङ्कारसारसंग्रहे उद्भटाचार्येण स्वकल्पितानां पुनरुक्तवदाभास-छेकानुप्रास-लाटानुप्रास-प्रतिवस्तूपमा-काव्यलिङ्ग-दृष्टान्त-सङ्कराणामलङ्काराणां दण्डिभामहमम्मट-प्रमुखानां ग्रन्थेष्वपि संज्ञाकरणत्वात् कथमत्र स्वकल्पितत्वमित्याकाङ्क्षा-निरसनाय दण्डिभामहादिनिर्णीतानामलङ्काराणामध्ययनादनन्तरं काव्यालङ्कारसारसंग्रहाख्य उद्भटविरचितो ग्रन्थः अध्येयः। उद्भटनिर्णीतानेतानलङ्कारान् पर्यालोच्य तेषामेवालङ्काराणां समानाख्याभ्योऽपि दण्डिभामहादिनिर्णीतेभ्योऽलङ्कारेभ्यो वैलक्षण्यम् आचार्योद्भटस्य च वैदग्ध्यं तथा प्रमाणान्तराभावदपि परिज्ञायते। वस्तुतः एतेषामलङ्काराणां सर्वादौ पर्यालोचनं विहितमुद्भटाचार्येणैव।

**काव्यलिङ्गविमर्शः**
काव्याभिमतं लिङ्गं काव्यलिङ्गम्। 'न्यायोऽनुमानं हेतुश्च लिङ्गं युक्तिः समर्थकः' [1] इति गोवर्धनाचार्योक्त्या लिङ्गं हेतुश्च समानार्थकौ। ननु काव्यस्य लिङ्गं हेतुरिति व्युत्पत्तेस्तु काव्यहेतुतया प्रतिभा-व्युत्पत्ति-अभ्यासादयो बोध्याः इति प्रतिभायाः व्युत्पत्तेः अभ्यासस्य च काव्यलिङ्गत्वम् अलङ्कारत्वमापततीति चेन्न, काव्यलिङ्गमिति पदे काव्यपदेन काव्यगतरमणीयत्वमिति अवगम्यम्। तेन च काव्यस्य काव्यगतरमणीयत्वस्य यल्लिङ्गं हेतुरिति काव्यलिङ्गमिति तस्य काव्यशोभावर्धनकारित्वेन अलङ्कारत्वं सङ्गतमेव। हेतुस्वरूपं चोक्तमग्निपुराणे-

'सिषाधयिषितार्थस्य हेतुर्भवति साधकः।
कारको ज्ञापकश्चेति द्विधा सोऽप्युपदिश्यते।।'[2] इति।

अत्र चालङ्कारे तर्कशास्त्राभिमतलिङ्गव्यावर्तनाय एव काव्यपदं नियुक्तम्। तेन च 'दण्डेन घटः' इत्यादौ चमत्काराभावान्न काव्यत्वमुपपद्यते।

---
[1] काव्यप्रकाशः, पृ. ६७७
[2] अग्निपुराणम्

हेतुगर्भत्वात् काव्यलिङ्गस्य हेत्वलङ्कार इत्यपरं नाम। अनुमानप्रक्रियायां निबद्धः हेतुरिव काव्यनिबद्धहेतुः अपि साध्यप्रतीतिघटकतया यदा सहृदहृदये चमत्कृतिमुपसृजति तदा काव्यलिङ्गालङ्कारः स्यात्। तथाहि लघुवृत्तिकारेणोच्यते काव्यालङ्कारसारसंग्रस्य टीकायां- 'काव्यलिङ्गं सरसपदार्थनिष्ठमेव भवति, न तु नीरसवस्तुनिष्ठं शास्त्रलिङ्गवदित्युपपन्नम्।'[3] इति।

काव्यलिङ्गं नामालङ्कारं प्राथम्येन चर्चास्पदं नीतमुद्भटाचार्येण काव्यालङ्कारसारसंग्रहे एव। तेन ग्रन्थस्य षष्ठे वर्गे संसृष्ट्यलङ्कारस्य चर्चानन्तरं रमणीयशैल्या शास्त्रीयप्रमाणानि ग्रन्थेऽस्मिन् निबन्धता प्रत्यक्षवद्दर्णनात्मकं भाविकं[4], काव्यलिङ्गं च (काव्यहेतु/काव्यदृष्टान्तः) विवृतम्। यत्र श्रुतः कविवर्णितो वा एकोऽर्थः अर्थान्तरस्य स्मृतेः अनुभवस्य वा हेतुर्भवति तत्र काव्यलिङ्गं नामालङ्कारो भवति। तथाहि उद्भटाचार्येण-

'श्रुतमेकं यदन्यत्र स्मृतेरनुभवस्य वा।
हेतुतां प्रतिपद्येत काव्यलिङ्गं तदुच्यते।।'[5] इति।

यत्र कविनोपात्तं किमपि एकं वस्तु श्रुतं सत् कविना नोपात्तं वस्त्वन्तरं स्मारयति अनुभावयति वा तत्र काव्यलिङ्गं नामालङ्कारः। वस्तुतोऽत्र हेतुमवलोक्य साध्यानुमानं भवति। तत्र व्याप्तिबलेन लीनमज्ञातमर्थं गमयति प्रीपयतीति लिङ्गम्। काव्येऽस्मिन् अज्ञातो हि अर्थः वस्त्वन्तरमेव, तच्च शब्दैर्नोपात्तं स्यात्। लिङ्गम्, अनुमापकं साधकञ्चेति शब्दाः समानमेवार्थं गमयन्ति। तर्कशास्त्रे खलु हेतुः त्रिविधः – केवलान्वयी, केवलव्यतिरेकी, अन्वयव्यतिरेकी चेति। हेतुभेदादनुमास्यापि त्रैविध्यं लक्ष्यते। तथाहि – केवलान्वयिना हेतुना केवलान्वय्यनुमानं, यथा घटोऽभिधेयः प्रमेयत्वात् पटवदिति। केवलव्यतिरेकिना हेतुना केवलव्यतिरेक्यनुमानं, यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादिति। अन्वयव्यतिरेकिना हेतुना अन्वयव्यतिरेक्यनुमानं भवति, यथा पर्वतो वह्निमान् धूमवत्त्वादिति। किन्तु अत्र काव्ये लिङ्गत्रैविध्यादनुमानत्रैविध्याच्च काव्यलिङ्गस्यापि तथा न त्रैविध्यम्। तार्किकाः खलु हेतुव्यापारस्य द्वैविध्यं मन्यन्ते। तथाहि लघुवृत्तिकारेण इन्दुराजेन - 'केचित् खलु तार्किकाः व्याप्तिग्रहणकाले यदनुभूतं व्यापकं बह्न्यादि वस्तु धूमादेर्व्याप्यस्य तत्स्मरणमात्रे धूमादिहेतुदर्शनप्रबुद्धसंस्काराणां पुरुषाणां हेतुव्यापारं मन्यन्ते। अपरे तु बह्न्यादीनां पर्वतादिधर्मविशेषसम्बन्धस्य पूर्वमगृहीतस्य धूमादिहेतुव्यापारसामर्थ्येन इदानीमेव अवसेयत्वाल्लिङ्गसामर्थ्याल्लिङ्ग्यनुभवस्यैव उत्पत्तिमाहुः। तदिदमुकतं - "स्मृतेरनुभवस्य वा" इति'[6] इति। केचित् खलु कमलाकरभट्टादयो हेतोर्द्वैविध्यं प्रसिद्धं मन्यन्ते। यथा कारकहेतुः ज्ञापकहेतुश्च। काव्यहेतौ कारकहेतुः, अनुमानालङ्कारे ज्ञापकहेतुश्च। यथा मृत्तिका घटस्य कारकहेतुः। पर्वते धूममभिलक्ष्य अप्रत्यक्षोग्यस्यापि वह्नेर्ज्ञानं भवतीति धूमः वह्नेः ज्ञापकहेतुः। रुय्यकानुसारी साहित्यदर्पणकारो विश्वनाथस्तु हेतुद्वयान्तरं तृतीयं समर्थकाख्यं हेतुविशेषं स्वीचकार। समर्थकहेतुस्तु चित्तं निर्दिष्टविषये दृढतया प्रभावितं करोति। त्रिविधाः हेतवः खलु त्रिषु अलङ्कारेषु क्रमेण विराजन्ते। यथा काव्यलिङ्गे कारकहेतुः, अनुमाने ज्ञापकहेतुः, अर्थान्तरन्यासे च समर्थकहेतुः।

काव्यलिङ्गमित्यलङ्कारे काव्यपदग्रहणादितरशास्त्रोपपन्नं हेत्वन्तरमवगम्यते। ननु काव्यग्रहणेन कथं तेषां हेतूनां सरसपदार्थनिष्ठत्वमुपपन्नम्। काव्यं खलु विविधगुणैः संस्कृतत्वात् सरसमेव न तु नीरसम्। तत्र गुणाः हि काव्यस्य माधुर्यौजःप्रसादलक्षणाः। गुणानां रसानुव्यञ्जकत्वात् गुणसंस्कृतं काव्यं सरसमेवेत्यर्थोऽवगम्यते। काव्यस्य रसोपजीव्यत्वाद् अनलङ्कारोपजीव्यत्वाद्वा काव्यलिङ्गमिति अलङ्कारः काव्याभिधायी असन्नपि काव्यशोभाभिधायी स्यात्। यथा युवतिवपुषि निबद्धमानाः अलङ्काराः वपुषः प्राणहीणाः लौकिकाः अपि वपुषः अलौकिकं शोभातिशयं प्रतिपाद्यते तथैव काव्यलिङ्गस्य काव्यात्मत्वाभावेऽपि काव्यशोभावर्धकत्वेनात्रोपपद्यते।

न खलु निर्गुणे काव्ये निबध्यमानामलङ्काराणां शोभाविधायित्वं दृश्यते। जरद्योषिति यथा अलङ्कराः शोभां नैव विदधाति, परम् तेऽलङ्काराः आत्मीयं सौभाग्यं जहाति। तथैव काव्यालङ्काराणामपि निर्गुणे काव्ये निबध्यमानानां काव्यशोभाहेतुत्वाभावः स्वशोभाहानिश्च भवति। तथाहि उवाच वामनभट्टः –

'युवतेरिव रूपमङ्ग काव्यं स्वदते शुद्धगुणं तदप्यतीव।
विहितप्रणयं निरन्तराभिः सदलङ्कारविकल्पकल्पनाभिः।।

यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनबन्धोऽयमङ्गनायाः।
अपि जनदयितानि दुर्भगत्वं नियतमलङ्करणानि संश्रयन्ते।।'[7] इति।

गुणरहितं हि काव्यमकाव्यमेव भवति किन्तु न हि अलङ्काररहितं काव्यमकाव्यमिति अलङ्काराणामनित्यत्वं ख्यापितम्। काव्ये अलङ्ङाकाराणां शोभा खलु गुणोपजनितभोभा एव। तथाहि लघुवृत्तिकारेण इन्दुराजेन- 'काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः पूर्वे नित्या इति, पूर्वे इति गुणा इत्यर्थः'[8] इति।

केलवं गुणसक्रियमाणशब्दार्थशरीरं काव्यमलङ्काररहितमपि क्वचिद्दृश्यते। तथाहि कवेः अमरुकस्य शृङ्गाररसात्मकोऽयं श्लोकः अलङ्कारहीनः। -

'कथमपि कृतप्रत्यापत्तौ प्रिये स्खलितोत्तरे
विरहकृशया कृत्वा व्याजप्रकल्पितमश्रुतम्।
असहनसखीश्रोत्रप्राप्तिप्रमादससंभ्रमं
विवलितदृशा शून्ये गेहे समुच्छ्वसितं ततः।।'[9] इति।

[3] काव्यालंकारसारसंग्रहः, लघुवृत्तिः, पृ.८४
[4] प्रत्यक्षा इव यथार्था दृश्यन्ते भूतभाविनः। अत्यद्भुताः स्यात्तद्वाचामनाकुल्येन भाविकम्।। काव्यालंकारसारसंग्रहः, ६/६
[5] काव्यालंकारसारांग्रहः, ६/७
[6] काव्यालंकारसारसंग्रहः, पृ.८४
[7] काव्यालंकारसारसंग्रहः, पृ.८२
[8] तत्रैव
[9] काव्यालंकारसारसंग्रहः.

अत्र श्लोके माधुर्यौजोभ्यां प्रस्तुतः प्रासादाख्यो गुणो विद्यते। अतोऽत्र काव्यत्वं सङ्गच्छते। न हि कश्चिदर्थालङ्कारो दृश्यते अस्मिन् श्लोके। ननु असहनसखीत्यादिना तु गोत्रस्खलितस्य सखीश्रोत्रप्राप्तिं विरहविप्रलम्भकारणत्वेनाशङ्क्य दृष्टिपरावृत्या सखीजनशून्ये गृहे परिदृष्टे यत्तन्नायिकया समुच्छ्वसितं तदुपनिबन्धात् सम्भोगशृङ्गारेण वाक्यार्थो निर्वाहितः। तथाहि सम्भोगस्य विप्रलम्भाबाधेन लब्धपदबन्धस्य उपनिबन्धाद्रसवत्वमलङ्कारः इति कथं निरलङ्कारोऽयं श्लोकः इति प्रागुक्तम्। अत्रोच्यते न हि रसानाम् अलङ्कार्यालङ्कारभावो दृश्यते, तेषां तु शरीरात्मकत्वाभावेन प्रतिपादनं दृश्यते। रसाः हि काव्यस्य आत्मस्वरूपाः, न हि शरीरस्य अलङ्कारस्वरूपाः। किञ्च रसाः हि काव्यस्यात्मत्वेन अवस्थिताः शब्दार्थौ च शरीरत्वेनावस्थितौ। यथा हि आत्माधिष्ठितं शरीरमेव जीवतीति दृश्यते तथा रसाधिष्ठितं काव्यं जीवतीति। अतः रसानां शरीरभूतशब्दार्थविषयतया आत्मेनावस्थानं स्यान्न तु अलङ्कारतया। रसाभिव्यक्तिश्च पुनः माधुर्यौजोभ्यां उपवृंहितेन प्रसादात्मना गुणेन सम्भवति। अतोऽत्र विप्रलम्भशृङ्गारोपकृतः सम्भोगशृङ्गारः सगुणकाव्यात्मत्वेन अवस्थितः। न तु काव्यस्य अलङ्कारत्वेन। तथाहि युक्तमुक्तं केनचित् - 'निरलङ्कारमपि काव्यं सगुणं दृश्यते'[10] इति। एवञ्च रसान्तरेषु रसभावाभासादिषु तत्प्रशमेषु च तथैव वाच्यम्। तथाहि-

'रसाद्यधिष्ठितं काव्यं जीवद्रूपतया यतः।
कथ्यते तद्रसादीनां काव्यात्मत्वं व्यवस्थितम्।।'[11] इति।

अतः गुणैः ससंस्कृतस्य सरसस्य शब्दार्थमयशरीरस्यैव काव्यत्वम्। किन्तु गुणशून्यत्वान्नीरसे व्याकरणादौ न काव्यत्वम्। एवं यदि स्यात्तदा भामहोक्तं - 'वृत्तदेवादिचरितशंसि चोत्पाद्य वस्तु च। कलाशास्त्राश्रयं चेति चतुर्धा भिद्यते पुनः।।' इति वाक्यस्य वैरुद्ध्यमापतति। उक्तश्लोके कलाशास्त्रं नाम व्याकरणशास्त्रादि। अत्र वक्तव्यमेतद्यत् कथं माधुर्यादिगुणरहितेषु व्याकरणादिष्वपि काव्यव्यपदेश इति। समाधानतयोच्यतेऽत्र मुख्यया वृत्त्या गुणसंस्कृतशब्दार्थशरीरमेव काव्यम्। गुणरहिते शब्दार्थशरीरे क्वचित् काव्यव्यपदेशस्तु काव्यसदृश्याद् उपचाराद् भक्तेर्वा लक्षणया वा तादृशः प्रयोगः स्यात्। उक्तं च- 'काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते भक्त्या तु शब्दार्थमात्रवचनोत्र गृह्यते।' इति। किन्तु तत्र व्याकरणादौ गुणसंस्काररराहित्यात् नैरस्यमुपपन्नम्। तत्र च उपचारात् रसहीनत्वेऽपि काव्यत्वे तथाविधं काव्यत्वमत्रालङ्कारे न युज्यते। अत्र तु सरसपदार्थनिष्ठमेव काव्यलिङ्गं भवति न तु नीरसवस्तुमात्रनिष्ठमिति।

काव्यलिङ्गालङ्कारस्योदाहरणं यथा –

'छायेयं तव शेषाङ्गकान्तेः किञ्चिदनुज्ज्वला।
विभूषाघटनादेशान् दर्शयन्ती दुनोति माम्।।'[12] इति।

अत्र शेषाङ्कदीप्तेः किञ्चित् मलिना छाया शोभा वा लिङ्गम्। तल्लिङ्गस्य सामर्थ्यात् भूषाविन्यासप्रदेशानाम् अतीतः भूषणसम्बन्धः अनुमीयते इति काव्यलिङ्गत्वमत्र श्लोके। प्रसङ्गेऽस्मिन् वनहट्टिमहोदयेनोक्तं - 'The lustre of the whole body of Parvatl, excepting the places where ornaments were worn, was a little diminished and therefore showed the places of ornaments more clearly.'[13] इति।

### क. वाक्यार्थहेतुककाव्यलिङ्गविमर्शः

वाक्यार्थो यदा हेतुर्भवति तदा वाक्यार्थगतं काव्यलिङ्गं स्यात्। अस्योदाहरणं यथा –

'वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान्।
नमन्मुक्तः सम्प्रत्यहमतनुरग्रेऽप्यनतिभाक्
महेश, क्षन्तव्यं तदिदमपराधद्वयमपि।।'[14] इति।

श्लोकस्यार्थस्तावदेवं हे त्रिपुरशत्रो शिव, मम उत्पन्नं शरीरं संदृश्य प्रतीयते यत् अहं पूर्वस्मिन् कस्मिन्नपि जन्मनि प्रायः त्वां न प्रणतवान्। वर्तमानजन्मनि च त्वां प्रणमन्नहं मुक्तो भविष्यामि। अतस्तदा शरीराभावात् प्रणामं कर्तुं न समर्थो भविष्यामि। मम अपराधद्वयमिदं क्षमस्व इति श्लोकार्थः। अत्र 'पुरा क्वचिदपि नाहं भवन्तं प्रणतवान्' 'अग्रेऽप्यहमनतिभाक्' इति च द्वयोः अवान्तरवाक्ययोरर्थो हि अनमनमिति। तच्च अपराधे हेतुभूतम्। अस्यापरमेकमुदाहरणं यथा –

'यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरम्
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी।
येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गताः
त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते।।'[15] इति।

तव सादृश्येनैव विनोदमेमीति भाग्येन न सह्यते – इत्यस्य हेतुः आदितः त्रिषु चरणेषु त्रिषु वाक्येषु निबद्धोऽस्ति। तत्र प्रथमवाक्यं हि तव नेत्रतुल्यत्वं धारयदीन्दीवरं जले निमग्नमिति। द्वितीयं तावत् – तव मुखसादृश्यं धारयन् चन्द्रः मेघे अन्तरितः इति। तृतीयञ्च – तव गतिसादृश्यं धारयन् राजहंसोऽपि अत्र न राजते इति च। अतोऽत्र वाक्यार्थहेतुकं काव्यलिङ्गस्योदाहरणतया गण्यते।

### ख. अनेकपदार्थहेतुककाव्यलिङ्गविमर्शः

अनेकपदार्थहेतुकस्य काव्यलिङ्गस्योदाहरणं यथा –

'प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत्।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः।।'[16] इति।

---

[10] काव्यालंकारसारसंग्रहः, पृ.८३

[11] काव्यालंकारसारसंग्रहः.

[12] काव्यालंकारसारसंग्रहः, उदा.८

[13] काव्यालंकारसारसंग्रहः. पृ.१६०

[14] काव्यप्रकाशः, पृ.६७८

[15] अलंकारकोषः, पृ.२०६

मालतीमाधवस्य पञ्चमेऽङ्के देव्याः चण्ड्याः अभिमुखे मालतीवधोद्यतम् अघोरघण्टं प्रति माधवस्योक्तिरियम्। हे पाप, प्रीतिमतीनां सखीनां सलीलो यः उपहासरसस्तेन प्राप्तैः मनोहरकपीतनकुसुमपातनैरपि यत् वपुः ग्लायति तस्मिन् मलतीवपुषि वधाय शस्त्रं चालयतस्तव मूर्ध्नि एषः करालः मद्बाहुदण्डः अकाले यमदण्ड इव पततीति श्लोकार्थः।

'वपुषि शास्त्रमुपक्षिप्तः' – इति पदसमूहः भुजपाते हेतुः। तस्मिन् पदसमूहे मुख्यक्रियाभावे वाक्यत्वाभावः समुत्पन्नः। तत्र एकपदमपि नास्ति। अनेकपदानां सत्त्वात् मुख्यक्रियाभावाञ्च खण्डवाक्यमित्यपि उच्यते। वस्तुतः 'एकतिङ् वाक्यम्' इति वैयाकरणमतमनुसृत्य तिङभावान्न वाक्यत्वमुपैति 'वपुषि वधाय तत्र तव शस्त्रमुपक्षिप्तः' इति पदसमुदायः।

ननु 'पदसमूहो वाक्यम्' इति रीत्या पदसमुहस्य वर्तमानादत्र वाक्यार्थतामेव उपपद्यते इति चेन्न 'पदसमूहो वाक्यं स्याद्यत्र चार्तसमाप्तिः' इति वचनात्। पदसमूहो वाक्यमिति सत्यं, किन्तु तत्र अर्थस्य समाप्तिः काङ्क्षिता। मीमासूत्रकारेण जैमिनिनापि सममेवोक्तं - 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यात्' इति। अतः अत्र अर्थस्य पूर्णताप्रास्यभावान्न वाक्यत्वमपि तु अनेकपदार्थत्वम्।

अनेकपदार्थहेतुककाव्यलिङ्गस्यापरमेकमुदाहरणं यथा –

'पश्यन्त्यसंख्यपथगां त्वद्दानजलवाहिनीम्।
देव, त्रिपथगात्मानं गोपयत्युग्रमूर्धनि।।' इति।

अत्र त्रिपथगा गङ्गा स्वयं शिवमूर्ध्नि गोपयति – इति उत्तरार्धस्य हेतुतया स्तूयमानस्य राज्ञः दानजलधारा अनेकमार्गैः प्रवहतीति पूर्वरार्ध एवोपपादितः। अत्र श्लोकस्य द्वितीयार्धे पूर्णक्रियाभावाद् अनेकपदाञ्च न वाक्यत्वम्। अतोऽत्र अनेकपदार्थहेतुक-काव्यलिङ्गालङ्कारः।

**ग. एकपदार्थहेतुककाव्यलिङ्गविमर्शः**

हेतुर्यदा एकपदार्थको भवति तदा एकपदार्थहेतुकं काव्यलिङ्गं स्यात्। अस्योदाहरणं यथा –

'भस्मोद्धूलन, भद्रमस्तु भवते रुद्राक्षमाले, शुभं
हा सोपानपरम्परां गिरिसुताकान्तालयालङ्कृतिम्।
अप्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-
लोकोच्छेदिनि मोक्षनामनि महामोहे विधयामहे।।'[17] इति।

इयञ्च भगवतो महादेवस्य अनुग्रहेण तत्त्वज्ञानिनः कस्यचिद्भक्तस्योक्तिः। हे भूत्यालेपन तुभ्यं कल्याणमास्ताम्। हे रुद्राक्षमाले भवत्यै शुभमस्तु। गिरिसुताकान्तस्य शिवप्रासादस्य सोपानपङ्क्तिं हा (तत्संस्कारकर्त्रभावादिति भावः)। अद्य सेवया तोषितेन शिवेन भवतां या सपर्या तदानन्दस्य यः अनुभवरूपप्रकाशः तदुच्छेदिनि मोक्षसंज्ञके महामोहे निधीयामहे वयमिति श्लोकार्थः। अत्र 'सपर्यासुखालोकोच्छेदिनि' इति समस्तपदाप्रयोगात् प्रकाशान्धकारयोः विरुद्धभावः प्रकटीभवति। तच्च मोक्षस्य महामोहकथने हेतुभूतम्। अतोऽत्र प्रकाशतया सपर्यासुखस्य, महामोहतया च तत्प्रकाशहारिणः मोक्षस्य कथमुचितमेव।

अत्रोदाहरणे 'सपर्यापदविधिः'[18] इत्यनेन 'युष्मत्सपर्यासुखलोकोच्छेदिनि' इति एकेनैव समस्तपदेन मोक्षस्य महामोहत्वे हतुरुच्यते। अतः एकपदार्थहेतुकं काव्यलिङ्गालङ्कारोऽत्र।

अस्यापरमेकमुदाहरणं यथा –

'त्वद्वाजिराजिनिर्धूतधूलीपटलपङ्क्तिलाम्।
न धत्ते शिरसा गङ्गां भूरिभारभिया हरः।।' इति।

पद्येऽस्मिन् उत्तरार्धस्य हेतुतया स्थितस्य पूर्वार्धस्य समस्तैकपदत्वात् एकपदार्थहेतुकं काव्यलिङ्गमलङ्कारः।

काव्यलिङ्गालङ्कारविषये आलङ्कारिकाणां वैमत्यं स्पष्टमेव। केचित् खलु अनुमान-काव्यलिङ्गयोरभेदं कल्पयन्ति। अलङ्कारविशेषकल्पनाप्रयोजकतया सौन्दर्यमेव माणदण्डस्वरूपं भवति। केषाञ्चिन्नये न हि विद्यते तावत् कापि चारुता काव्यलिङ्गे यस्याः कृते तस्य पृथगलङ्कारत्वं स्वीक्रियेत इति। एतेषां पण्डितानां मते काव्यलिङ्गे यद्धेहुः स्यात्तद्धि वास्तव एव। किन्तु अपरतः काव्यस्य स्वातन्त्र्यं स्वीकुर्वन्तो ये पण्डिताः विद्यन्ते तेषां नये तद्धेतोः वास्तवत्वेऽपि कविप्रतिभाजन्यत्वात् विच्छित्तिविशेषजनको भवतीति। न हि कविप्रयुक्तौ शब्दार्थौ अभिनवौ। अस्मदनुभूतशब्दार्थौ एव कविः प्रयुज्यते, किन्तु शब्दयोजनं शब्दविन्यासं वा कवेः स्वकीयं भवति। तत्रैव तत्काव्यस्य चारुत्वम्। युक्तमुक्तं नीलकण्ठेन –

'यानेव शब्दान् वयमालपामो यानेव चार्थान् वयमुल्लिखामः।
तैरेव विन्यासविशेषभव्यैः संवेदयन्ते कवयो यशांसि।।'[19] इति।

हेतु-हेतुमद्भावस्य काव्यलिङ्गार्थान्तिरन्यासयोः सत्त्वादुभयोरैक्यं भासमानमपि अनैक्यमस्त्येव। उक्तञ्च विश्वनाथेन काव्यलिङ्गे निष्पादकहेतुः, अर्थान्तिरन्यासे च समर्थकहेतुरिति द्वयोर्भेदः। तथाहि साहित्यदर्पणे - 'निष्पादकः काव्यलिङ्गस्य, समर्थकः अर्थान्तिरन्यासस्य इति पृथगेव कार्यकारणभावे अर्थान्तिरन्यासः काव्यलिङ्गात्' इति। मम्मटायः आलङ्कारिकास्तु कार्येण कारणसमर्थनरूपः, कारणेन कार्यसमर्थनरूपश्च यदर्थान्तिरन्यासभेदोऽस्ति तद्धि वाक्यार्थगतकाव्यलिङ्गस्यैवापरं रूपमिति स्वीकुर्वन्ति। किन्तु विश्वानथस्तु तेषां मतं नाङ्गीकरोति। स्वपक्षसमर्थनाय यदुक्तिं तद्धि अनुमाने, अर्थान्तिरन्यासे, काव्यलिङ्गे च त्रिष्वेव अलङ्कारेषु हेतु-हेतुमद्भावसत्त्वेऽपि हेतोर्वैभिन्न्यं परिलक्ष्यते। यथा अनुमानालङ्कारे ज्ञापकहेतुः, काव्यलिङ्गालङ्कारे निष्पादकहेतुः, अर्थान्तिरन्यासालङ्कारे समर्थकहेतुश्च। अत एव अर्थान्तिरन्यासे समर्थ्य-समर्थकभावरूपहेतु-हेतुमद्भावसत्त्वात्,

[16] काव्यप्रकाशः, पृ.६७९
[17] काव्यप्रकाशः, पृ.६७९
[18] अष्टाध्यायी, २/४/१
[19] अलंकारविमर्शः, पृ.१७७

काव्यलिङ्गे च निष्पाद्य-निष्पादकभावरूपहेतु-हेतुमद्भावसत्त्वात् उभावेवलङ्कारौ भिन्नाविति।
काव्यलिङ्गालङ्कारस्य लक्षणे लिङ्गशब्दग्रहणात् तार्किकप्रसिद्धहेत्वन्तरं हि काव्यस्य लिङ्गमिति यदालोचितं तद्धि भट्टोद्भटस्य न्यायपारङ्गमत्वं प्रस्फुटितम्। वाक्यार्थहेतुकादीनां काव्यलिङ्गभेदानां सोदाहरणं सविस्तरञ्च व्याख्या मयात्राध्याये कृतम्। उद्भटकृताः काव्यलिङ्गभेदाः इतरालङ्कारिकेभ्यः वैलक्षण्यं प्रतिपादयन्तीत्यप्यत्रालोचितमिति विशेषः।

**सहायकग्रन्थाः**


1. उद्भट; काव्यालङ्कारसारसंग्रह; सम्पा. रामस्वामिशास्त्री शिरोमणि; वरोदाः ओरियेन्टल् इस्टिटिउट्; १९३१.
2. पण्डितराज जगन्नाथ; रसगङ्गाधरः; सम्पा. श्री मधुसूदनशास्त्री; वाराणसीः काशी हिन्दू विश्वविद्यालयीयसंस्कृतसाहित्यानुसन्धानम्; २०२० वि.स..
3. भामह; काव्यालङ्कारः; सम्पा.रामानन्दशर्मा; वाराणसीः चौखम्बा-संस्कृत-सिरिज्-अफिस्; २०१३.
4. मम्मट; काव्यप्रकाशः; सम्पा. वामनाचार्यः; दिल्लीः परिमल् पाब्लिसार्स्; २००८.
5. मम्मट; काव्यप्रकाशः (पञ्चमखण्डः, षोडशटीकासमन्वितः) ; सम्पा. ज्योत्स्ना मोहन; दिल्लीः नाग-पाबलिसार्स; १७७७.
6. मम्मट; काव्यप्रकाशः (प्रदीपोद्योतटीकासमेतः); सम्पा.अभ्यङ्करवासुदेवशास्त्री; वाराणसीः चौखम्बा-संस्कृत-संस्थानम्; १९९४.
7. महिमभट्ट; व्यक्तिविवेकः; सम्पा.रेवाप्रसादद्विवेदी; वाराणसीः चौखम्बा-संस्कृत-सिरिज्-अपिस्; १९६४.
8. विश्वनाथ; साहित्यदर्पणः; सम्पा. कृष्णमोहनशास्त्री; वाराणसीः चौखम्बासंस्कृतसंस्थानम्; २०१४.
9. विश्वनाथ; साहित्यदर्पणः (हरिदाससिद्धान्तवागीशभट्टाचार्येण कुसुमप्रतिमा-टीकासमेतः); सम्पा. श्रीहेमचन्द्रतर्कवागीशभट्टाचार्य; कलिकाताः १९५०.
10. संस्कृतकाव्यशास्त्रेतिहासः; जगदीशचन्द्रमिश्र; वाराणसीः चौखम्बा-सुरभारती-प्रकाशन; २०१५.
11. अप्पयदीक्षित; कुवलयानन्दः; सम्पा. प्रो. जयशङ्करलालत्रिपाठी; वाराणसीः चौखम्बा संस्कृत सीरीज आफिस; २०१६.
12. ड. ब्रह्ममित्र अवस्थी; अलङ्कार कोष; दिल्लिः इन्दु प्रकाशन; १९१९.
13. भामह; काव्यालंकारः; सम्पा. रामानन्दशर्मा; वाराणसीः चौखम्बासंस्कृतसिरिज्-अफिस्; २०१३.
14. मम्मट; काव्यप्रकाशः; सम्पा.गजानशास्त्री मुसलगाँवकर; वाराणसीः कृष्णदास एकादमी;२०१३.
15. रुय्यक; अलंकारसर्वस्वम्; सम्पा. रेवाप्रसादद्विवेदी; वाराणसीः चौखम्बासंस्कृतसंस्थानम्; १९३९.
16. रुय्यक; अलङ्कारसर्वस्वम्; सम्पा. ड.त्रिलोकीनाथ द्विवेदी; वाराणसीः चौखम्बा सुरभारती प्रकाशन; २०१६.
17. रुद्रट; काव्यलङ्कारः; सम्पा.रामदेवशुक्ल; वाराणसीः चौखम्बाविद्यभवन; २०१४.
18. वामन; काव्यालङ्कारसूत्रवृत्तिः; सम्पा. केदारनाथशर्मा; वाराणसीः चौखम्बाप्रकाशनम्; १९८२.
19. वामन शिवराम आप्टे; संस्कृत-हिन्दी कोश; दिल्लीः मोतीलाल बनारसीदास पब्लिशर्स प्राइवेट लिमिटेड; १९६१.
20. विभाराणी दुवे; ध्वनिपूर्व अलङ्कारशास्त्रीय सिद्धान्त और ध्वनि; वाराणसीः भारतीय विद्या प्रकाशन; १९९४.
21. रुद्रट; कव्यालंकारः; सम्पा. रामदेवशुक्ल; वाराणसीः चौखम्बाविद्याभवनम्; १९६२.
22. Kane PV. History of Sanskrit Poetics; Delhi-Varanasi-Patna: Motilal Banarasidass, 1987.
23. De SK. History of Sanskrit Poetics; Calcutta: Firma KLM, 1959.
24. Udbhata. Kavyalankara-Sara-Sangrah; Narayan Daso Banhatti; Poona: Bhandarkar Oriental Research Institute 1982.